SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:12 Issue: 07
October 2025, Price Rs.20/-
No. of pages-24

तिरुमलतिरुपतिदेवस्थानानि

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

October 2025

Rs.20/-



## तिरुमलस्थ पुष्पयागमहोत्सवः

30.10.2025



## नूतनकार्यनिर्वहणाधिकारिभ्यः घनस्वागतम्

10.09.2025 तिथौ श्री अनिल् कुमार् सिंघाल् ऐ.ए.यस्., महोदयाः ति.ति.देवस्थानकार्यनिर्वहणाधिकारित्वेन द्वितीयवारं कार्यनिर्वहणाधिकारकार्यबाध्यतां स्वीकृतवन्तः। प्रथमं तिरुमल देवालयरङ्गनायकमण्टपे आचारमनुसृत्य निर्गच्छतः जे.श्यामला रावु, ए.ऐ.यस्., महोदयात् कार्यनिर्वहणबाध्यतां स्वीकृतवन्तः। पश्चात् श्रीवेङ्कटेश्वरस्वामिपुरतः प्रतिज्ञां चकार। पालकसभ्यत्वेन, यक्स्. अफिसियो कार्यदर्शित्वेन बाध्यतां स्वीकृतवन्त। श्रीवेङ्कटेश्वरस्वामिदर्शनानन्तरं वेदाशीर्वचनं प्राप्य ततः तीर्थप्रसादं स्वीकृत्य श्रीवेङ्कटेश्वरस्वामिनः छायाचित्रपटं प्राप्तवन्तः। अस्मिन् कार्यक्रमे धर्मकर्तृमण्डल्यध्यक्षः सभ्याः अन्ये प्रधानाधिकारिणश्च भागं गृहीतवन्तः। ति.ति. देवस्थानकार्यनिर्वहणाधिकारित्वेन पूर्व समये 2017 मे मासात् आरभ्य अक्टोबर् 2020 पर्यन्तं अनेकाभिवृद्धिकार्याणि, नूतन संस्करणानि, यस्.यस्.डि. टोकन् पद्धतिं च आरभ्य नूतनसौकार्याणि तिरुपति तिरुमल देवालयेषु कारितवन्तः। एते पूर्वकार्यनिर्वहणाधिकारकाले सप्तगिरिमासपत्रिकानां गौरवसम्पादकाः अप्यासन्। अद्य सप्तगिरिमासपत्रिकाप्रधानसम्पादकः अन्ये च आधिकारिणः सभ्याश्च हृदयपूर्वकस्वागतमुक्त्वा शुभाकांक्षाः ऊचुः।



## उद्योगान्निर्गमनसमयशुभाकांक्षावितरणसमावेशः

2024 जून् मासादारभ्य सेप्टम्बर् 2025 पर्यन्तं कार्यनिर्वहणाधिकार्यं कृतवते श्री जे.श्यामलारावु ऐ.ए. यस्., महोदयाय 09.09.2025 तिथौ उद्योगान्निगमनसमये ति.ति.देवस्थानपरिपालनभवनसमावेश कार्यलये कार्यालयस्थाः उद्योगिनः समुचितसत्कारंचक्रुः। अयं कार्यनिर्वहणकाले बहुपद्धतीः नवीनीकरणं चकार। लड्डुरुच्यभिवृद्धीकरणं, लड्डु निर्माणं, निर्माणविधानश्च अन्नप्रसादं अधिकृत्य भक्तेभ्यः अभिप्राय स्वीकरणं, पुनः व्यर्थ पदार्थसदुपयोगकरणं, आगतेभ्यः सम्यक् सहायकारित्वं, कियोस्क् यन्त्रं तिरुमलक्षेत्रे यन्त्रपरिकरणविनियोगपद्धतिं अन्यांश्च नूतनपद्धतीः प्रारेभे। अद्यायं प्रभुत्वप्रधान कार्यदर्शित्वेन साधारण परिपालनकार्यदर्शित्वेन च नियुक्तः। अस्मिन् कार्यक्रमे ति.ति. देवस्थान प्रधानाधिकारिणः भागं गृहीतवन्तः।



# गीतामृतम्

श्रीभगवानुवाच -

तानि सर्वाणि संयम्य युक्त आसीत मत्परः।
वशेहि यस्येदिन्द्रयाणि तस्य प्रज्ञापतिष्ठिता।।

ध्यायते विषयान्पुंसस्सङ्गस्तेषूपजायते।
सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते।।

क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः।
स्मृतीभ्रंशाद्बुद्धिनाशो बुद्धिनाशात् प्रणश्यति।।

(भगवद्गीता २.६१,६२,६३)

६१. भावः - अनुष्ठानपरेण सर्वाणीन्द्रियाणि सम्यक् वशीकृत्य मय्येव परमात्मनि एकीकरणमनसा भाव्यम्। यतः यस्यन्द्रियानि स्वाधीने भवन्ति तस्य ज्ञानं स्थिरं भवति। स एव स्थितप्रज्ञः।

विशेषांशः - श्लोके सर्वाणी तिकथनात् एकमपि इन्द्रियं अनिगृहीतं चेत् प्रमादहेतुः स्यात्। अतः सर्वाणीन्द्रियाणि वशीकर्तव्याणीति आदेशः। कुम्भे एकरन्ध्रेऽपि सर्वं जलं बहिर्गमिष्यति। वातायने एकेऽपि उद्घाहिते दीपः नश्यति।

६२. भावः - मनुजस्य शब्दविषयचिन्तनया तद्विषयेषु आसक्तिर्जायते। तदासक्त्या तस्मिन् कामः उदेति। तत्कामात् कोपः अभिजायते। कोपादविवेकः, अविवेकात् विस्मृतिः, स्मृतिभ्रंशात् क्रमशः बुद्धिनाशः सम्भवत्ति। बुद्धिनाशात् सम्पूणतया विनाशं प्राप्नोति।

विशेषांशः - विषयचिन्ता बह्वनर्थकारिणी। शत्रुःमित्रवत् शनैः अन्तः प्रविशति, आदौ किञ्चित्सथलमेव आक्रम्य क्रमशः वामनमूर्तिरिव विस्तृत्य स्थलदातारमेव हन्ति। कामक्रोधौ परमशत्रुभूतौ। कामप्रतिबन्धकेतु क्रोधः। क्रोधात् आत्मानमेव विस्मरति। चित्रविचत्रविकलत्वं प्राप्य रक्तनयनः युक्तायुक्तविचक्षणरहितः, आवेशपूरितः भूताविष्टः इव भवति। अतः क्रोधात् सम्मोहः स्मृतिभ्रशः बुद्धिनाशः, ततः महापतने मानवः प्रविशेदित्युक्तम्।

## सङ्कीर्तनम्

श्रीहरिनित्यशेषगिरीश
मोहनकार मुकुन्द नमो श्रीहरि
देवकीसुत देववामन



गोविन्द गोपगोपीनाथ। श्रीहरे!
गोवर्धनधर गोकुलपालक!
देवेशाधिक ते नमो नमो
सामजावन सारङ्ग शार्ङ्गपाणे
वामन! कृष्ण! वासुदेव! श्रीहरे
रामनाम! नारायण विष्णो
दामोदर श्रीधर नमो नमो
पुरुषोत्तम पुण्डरीकाक्ष
गरुडध्वज करुणानिधि श्रीहरे
चिरन्तनाच्युत करुणानिधि श्रीहरे
चिरन्तनाच्युत श्रीवेङ्कटेश
नरामृत ते नमो नमो।

(अन्नमाचार्य आध्यात्मक सङ्कीर्तनम् - ३२)

सम्पादकीयम्

# श्रीवेङ्कटेश्वरस्वामिसन्निधौ

# दीपावल्यास्थानम्

दीपं ज्योतिः परब्रह्म दीपं सर्वतमोपहम्।

दीपेन साध्यते सर्वं सन्ध्यादीप नमोस्तु ते।।

सर्वजगत्पभोः श्रीनिवासय निर्वाह्यमान वार्षिकोत्सवेषु दीपावल्यास्थानमेकम्। ब्रह्मोत्सवेषु आनन्दनिलयानन्तरं बहिरागत्य रङ्गनायकमण्टपे विद्यमानः श्रीमलयप्पस्वामी श्रीदेवीभूदेवीभ्यां सह दीपावलीदिने आस्थानार्थं घण्टामण्टपमागच्छति। पश्चात् उभयदेवीभ्यां सहितं मलयप्पस्वामिनं स्वर्णद्वारपुरतः संसिद्धसर्वभूपालवाहने गरुडाल्वारोः अभिमुखतया निवेशयन्ति। सेनापतिं विष्वक्सेनमपि स्वामिनः वामपाश्वे अन्यपीठे दक्षिणाभिमुखतया निवेशयन्ति। पश्चात् अन्तःस्थ मूलमूर्तेः बाह्ये सर्वद्रष्टुत्वेन विद्यमान स्वामिनः द्वितीययार्चनं निर्वहन्ति। पश्चात् आस्थानप्रसादाः ममेकारिभिरानीताः सन्तः पार्श्वे छत्रचामारमङ्गलवाद्यपुरस्सरं बहिरागत्य ध्वजस्तम्भप्रदक्षिणतया आगत्य अन्तः सर्वदर्शनत्वेन समर्पणानन्तरं द्वितीयघण्टा प्रवर्तते। पश्चात् श्रीजिय्यंगारुमहोमहोदयाः षट्पीताम्बरवस्त्राणि रजतस्थाले निक्षिप्य ति.ति.देवस्थानाधिकारिषु पाश्वे आगतेषु सत्सु मङ्गलवाद्यछत्रचामरैः प्रस्थाय ध्वजस्तम्भस्य प्रदक्षिणतया आगत्य विमानप्रदक्षिणं कुर्वन् आनन्दनिलयान्तः समर्पयन्ति। अर्चकस्वामिनः तेषु चत्वारि श्रीस्वामिमकुटस्थ स्वाङ्गस्य उत्तरीयत्वेन आदिमालात्वेन समर्प्य अक्षतारोपणं कृत्वा नीराजनं समर्पयन्ति पश्चात् श्रीजिय्यंगारुमहोदयः शिष्टवस्त्रद्वयेन प्रस्थाय प्रतिष्ठितस्वामिस्थाने समर्पयति। आस्थाने अर्चकाः शिष्टेषु एकं मलयप्पस्वामिने, अन्यं विष्वक्सेनाय समर्पयन्ति। पश्चात् श्रीस्वामिन विष्वक्सेनाय च अक्षतारोपणं प्रवर्तते। पश्चात् विष्वक्सेनाय, अर्चकेभ्यः शठारिगौरवं प्रवर्तते। पश्चादर्चकाः स्वामितः तण्डुलानि दक्षिणघनश्च दानत्वेन स्वीकृत्य ''नित्यैश्वर्यो भव'' इति स्वामिनं प्रति अशिषः वदन्ति। पश्चात् जिय्यंगारुमहाशयाय देवस्थानाधिकारिभ्यः नीराजनं, चन्दनशठारिगौरवानि प्रवर्तन्ते। अन्ते स्थानिकेभ्यः अपि नीराजनं, चन्दनशठारिगौरवं कुर्वन्ति। पश्चात् प्रसादविनयोगः प्रवर्तते। इदं ''दीपावल्यास्थानं'' स्वर्णद्वारपुरतःस्थघण्टामण्टपे प्रवर्तते। दीपावली दिने सूर्योदयात् पूर्वमेव तैलाभ्यङ्गनस्नानं कर्तव्यम्। इदं पापक्षयार्थं गङ्गास्नान समम्। लक्ष्मी पूजादीपावली दिने अवश्यं कर्तव्या। अस्मिन् दिने भूलोके गृहं गृहमागत्य लक्ष्मीः परिभ्रमतीति लक्ष्मीकलां निक्षिपतीति भारतीयानां विश्वासः।



हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापिवा।

# अक्टोबर् - २०२५

सम्पुटिः-१२ सञ्चिका-०७

स्वस्तिश्री चान्द्रमानश्रीविश्वावसुनामसंवत्सर आश्वयुजशुद्धनवमीबुद्धवारादारभ्य - कार्तिकशुद्धदशमी - शुक्रवारपर्यन्तम् - २०२५



दुर्गाभवानीदेवी चरितम् 06
- डा पि.माधवी

दीपावळी नरकचतुर्दशी 07
डा वि.माधवरेड्डि

वेदान्तदेशिकः 08
- आचार्य जि.पद्मनाभम्

शमी पूजा 10
- कुमारी लिङ्गरेड्डि उमामहेश्वरी

यज्ञवाल्क्यजयन्ती 16
- डा जि.चन्द्रशेखर्

तरिगोण्डवेङ्गमाम्बा-वर्धन्ती 18
- डा के.कोटेश्वरय्य

अहङ्कारः पतनायैव, ऋषीश्वराः सर्वदा गौरवनीयाः (चित्रकथा) 20
- डा.के.सूर्यनारायणरेड्डि

द्वादशराशीनां फलानि 22
- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः


मुखचित्रम् - उभयदेवीभ्यां श्रीमल्लयप्पस्वामी, तिरुमल।

अन्तिमपुटचित्रम्:- श्रीमनवालमहामुनिः, तिरुमल।

(चित्रकारः एम्.ई.रुद्रमूर्तिः)


## सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.

दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
प्रधानसम्पादकः,
०८७७ - २२६४३६३

सूचनानाम्, आक्षेपाणां च कृते सम्पर्कं कुर्वन्तु -

chiefeditortpt@gmail.com


एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-

*वेङ्कटाद्रिसमं स्थानं*
*ब्रह्माण्डे नास्ति किञ्चन ।*
*वेङ्कटेशसमो देवो*
*न भूतो न भविष्यति ॥*


तिरुमलतिरुपतिदेवस्थानम्

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

गौरवसम्पादकः:-
श्री अनिल् कुमार सिङ्घाल् I.A.S.,
कार्यनिर्वहणाधिकारी, ति.ति.देवस्थानानि।

प्रकाशकः -

सम्पादकः, प्रधानसम्पादकः( F.A.C.)
डा॥ वि.जि.चोक्कलिङ्गम्, M.A., Ph.D.,

मुद्रापकः -

श्री आर्.वी.विजयकुमार् B.A.,B.Ed.,
उपकार्यनिर्वहणाधिकारी
मुद्रणालय - पुस्तकविक्रयक्रेन्द्रम्
ति.ति.देवस्थानम्, तिरुपति

मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः,सहायक-छायाचित्रग्राहकः, ति.ति.दे.





सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
– *प्रधानसम्पादकः*



# दुर्गाभवानीदेवी चरितम्

- डा.पि.माधवी चरवाणी - ८५१९८०४७८४

(तदनन्तरम्) देवीजन्माधिकृत्य अन्यापि कथा एवं वर्तते। महिषासुरनामक -राक्षस चक्रवर्ती देवताः पराजित्य देवलोकशासकः बभूव। तदा देवताः ब्रह्मनेतृत्वेन विष्णुशङ्कर सकाशं गत्वा स्वदारुणकथां निवेदयामासुः। विष्णुशङ्करौ देवतानां उत्साहशक्तिमवलोक्य तत्साहाय्यार्थं सन्नद्धावास्ताम्। शिवविष्णु भावनया महाशक्तिः देवता मुखादाविबूय नारीरूपं दधार। तस्याः तेजःपुञ्जः सर्वत्र व्याप्तः। प्रसन्नाः सन्तुष्टाः देवाः स्वखड्गानि महिषासुरसंहाराय शक्तिस्वरूपिन्यै देव्यै ददुः। देवी महाट्ट-हासञ्चकार। तदा तददृहासं श्रुत्वा महिषासुरः स्वसैन्येन तदुपरि विजृम्भमानः आसीत्। तदा देवी स्वश्वासात् सहस्रदेवीगुण। उत्पदयित्वा असुरान् विनाशयामासा। तदा महिषासुरः शरभरूपं धृत्वा तदुपरि, पपात। देवी तं बद्धुं पाशं प्रयुयोज। तदा सः सिंहरूपं धृत्वा देवीगदां नाशयितुमारेभे। तन्मस्तकच्छेदनाय प्रवृत्तायां देव्यां सः पूर्वरूपं दधार। तदा देवी विषबाणवर्षं वर्षापयामास। सः पुनः महागज रूपं दधार। तदा क्रुद्धा देवी महिषासुररूपधारिणः तस्य शिरः खङ्गेन चिच्छेद। महिसासुरविनाशात् देवीं दुर्गां महिषासुरमर्दनीति वदन्ति।सर्वदेवतातेजः एव देवीजन्म। लोके महिषासुररूपपापिनः विनाशः कर्तव्य इति कथोद्देशः। देवीदुर्गासम्बन्धिनी तृतीयकथा एवं वर्तते। शुम्भनिशुम्भनामकौ सोदरौ महाशक्तिमन्तौ देवलोकमाक्रम्य देवान् पराजितान् चक्रुः। पलायिताः देवाः दुर्गादेवीं शरणं प्राप्य तद्वधार्थं वाग्दानं प्रापुः। देवी पार्वती देवगणानां बाधाः, तन्निवारणार्थं तत्तपः ज्ञात्वा स्वशक्तिरूपदुर्गां देव्यां प्रवेशयामास। पार्वतीदेवीशक्तिप्रवेशात् दुर्गा महा सौन्दर्यवती तेजोवती च भूत्वा, सञ्चरति स्म। शुम्भनिसुम्भौ स्वभृत्य द्वारा दुर्गादेवीसौन्दर्यं श्रुत्वा तां स्वभार्यत्वेन अङ्गीकरणाय सन्देशं प्रेषयामासतुः। तदा सा युद्धे मां परजितां कृताञ्चेत् तदभिलाषं पूरयिष्यामीत्यवोचत्। तच्छ्रुत्वा शुम्भः स्त्रिया युद्धमपमानकारकमिति स्वसेनानायकौ चण्डमुण्डौ प्रेषयामास। देवी युद्धे, चण्डमुण्डौ अवलीलया अवधीत्। तदा तस्याः नाम कोशिकी स्थाने चामुण्डीति परिणतम्। चण्डमुण्डमरणात् क्रुद्धः शुम्भः स्वसहोदरं निशुम्भं रक्तबीजं सेनापतिंसैन्येनसह देव्या युद्धाय प्रेषयामास। तदा बहुरूपाणि धृत्वा महासंग्रामे तान् पलायितान् चकार। रक्तबीजस्य एकः वरप्रभावः वर्तते। तस्य भक्तं बूमौ पतितश्चेत् अनेकसंख्या रक्तबीजोत्पत्तिः स्यात्। तस्य वरबलं ज्ञात्वा देवी कालीरूपं धृत्वा तस्य रक्तस्य भूपतनात् पूर्वमेव तद्रक्तं पाति स्म। एवं देवी एकाकिनं रक्तबीजं तत्सैन्यं सर्वं विनाशयामास। ततः स्वबहूनि रूपाणि एकीकृत्य देवी शुम्भनिसुम्भौ युद्धे मारयामास। देश प्रजारक्षणार्थं बहुरूपाण्यपि धृत्वा देशरक्षणं सत्यधर्म रक्षणार्थं कर्तव्यमिति अन्तरार्थः एतत्कथा सन्देशः बोध्यते। इमां कथां दुर्गासप्तशतीग्रन्थे, सुरथ,राज्ञे, समाधिनामकवैश्याय मेधाऋषिः महामायायाः देव्याः महात्म्यं बोधयित्वा देव्यनुग्रहार्थं तपः कर्तुमादिदेश। तत्तपसा सन्तुष्टा देवी राज्ञः राज्यभ्रष्टत्वं कदापि न भविष्यतीति वरं, वैश्याय ममतामोहविनाशरूपवरं ददौ।

दुर्गापूजा रामनवरात्रमिति गौरीनवरात्रमिति च वदन्ति। चैत्रशुक्लप्रतिपत्तितः आरभ्य श्रीरामनवमीपर्यन्तं चलति। द्वितीयं दुर्गानवरात्रं आश्वयुजशुक्लप्रतिपत्तितः आरभ्य दुर्गाष्टमी पर्यन्तं चलति। महत्वदृष्ट्या दुर्गानवरात्रस्य विशेषप्रामुख्यं वर्तते। अस्मिन् पर्वदिने दुर्गायाः विभिन्नरूपाणां स्मरणं पूजनव्रतानि, सप्तशतीपाठकार्यक्रमः प्रवर्तते। दुर्गाष्टमीं पर्वदिने कुमारीकन्यानां दुर्गाप्रतीकात्वं सम्भाव्य तत्पूजामाचरन्ति। ताभ्यः भोजनादिसत्कारः देयः। बेंगाल्राष्ट्रे महावैभवोपेत -तया दुर्गापर्वदिनं निर्वहन्ति। दुर्गायाः आकर्षकमूर्तिं निर्मान्ति। दीपान् जले प्रवाहयन्ति। वर्षे वर्षे भारते, विदेशेषु च हैन्दवाः दुर्गानवरात्रपूजां शास्त्रोक्तरीत्या निर्वहन्ति। आदिपराशक्तिः जगन्माता दुर्गादेवी - लक्ष्मीदेवी - सरस्वतीदेवी - गायत्री देवी - राधादेवीति पञ्चदिव्यस्वरूपैः शिव, शिवप्रियनारायणी - विष्णुमायागणेश मातृ पूर्णब्रह्मस्वरूपिणीत्वेन सर्वाभिः देवताभिः लोकत्रयेण पूज्यमाना सर्वभक्तपापानि नाशयति।





स्त्रियोहिनाम खल्वेताः निसर्गादेवपण्डिताः।

- डा वि.माधवरेड्डि
चरवाणी - ९९४८५२३२५९

# दीपावळी नरकचतुर्दशी

श्रीकृष्णेन नरकासुरसंहारात् नरकचतुर्दशीति नामागतमिति वदन्ति। हिमालयपर्वतस्थ प्राग्ज्योतिषपुरदुर्गे राक्षसराजः नरकासुरः आसीत्। सः भूदेवीपुत्रः सकलदेवताः पीडयति स्म। इन्द्रसिंहासनमाक्रम्य अदिति देवता मातुः कर्णकुण्डलानि जग्राह। बहुस्त्रीमानभङ्गंचकार। ताः कारागारबद्धाः कृत्वा अवमानिताश्चकार। इन्द्रः श्रीकृष्णं शरणं प्राप्य नकरबाधानिवारणाय अर्थयामास। सत्यभामासहितः श्रीकृष्णः प्राग्ज्योतिषपुरं योद्धुं जगाम। दुर्गरक्षकः पञ्चमुखमुरासुरः श्रीकृष्णेन योदधुमाजगाम। श्रीकृष्णः तस्य पञ्चमुखानि चक्रेण खण्डितानि चकार। योद्धुमागतान् मुरासुरसप्तपुत्रानपि कृष्णः जघान। तदा नरकासुरे योद्धुं स्वयमागते तमप्यवलीलया हत्वा ततः प्राग्ज्योतिषपुरं प्रविवेश। भूदेवी आगत्य स्वामिन्। त्वया अस्मात्पुत्रद्वयं हतम्। वराहावतारे त्वसंसर्गात् नरकासुरः अजायत। तेन देवताः विजित्य आनीतं धनं सर्वं मद्रक्षितं वर्तते। तद्धनं स्वीकृत्य नरकपुत्रं भगदत्तं रक्ष इत्युवाच। तदा श्रीकृष्णः प्राग्ज्योतिषपुरे बद्धाः सर्वाः स्त्रियः कारागर- विमुक्ताः कृत्वा भगदत्तं पट्टाभिषिक्तं चकार। तदा देवताः मानवाः महासन्तोषेण दीपमालिकाः प्रज्वालयामासुः। तदा-रभ्यैव दीपावली पर्वदिनं समारब्धम्। नरकः प्रातःकाले हतः इति तत्पीडापरिहारचिह्नतया तस्मिन् समये शिरस्नानं प्रधानाचारः। अस्मिन् पर्वणि जाज्वल्यमानाः टपाकादयः नरकासुरे प्रयुक्तमारणायुध चिह्नान्येव। केषुचित् प्रान्तेषु नरकासुरमरणदिनत्वात् नरकासुरविग्रहं दाहयन्ति। दीपमालिकाभिः लक्ष्मीदेव्यै नीराजनसमर्पणदिनत्वात् पर्वणः दीपावलीति नामागतमिति केचिद्वदन्ति। नरकलोकवासिभ्यः दीपावलिः कल्प्यते इतिकारणात् दीपावली नाम इति केषाञ्चिद्वादः। हिन्दूमतसंस्कृति सम्प्रदायानां दीपावली पर्व एकं चिह्नम्। राक्षसराजः बलिचक्रवर्ती विष्णुना पदाहत्या पातालं प्रेषितत्वात् महोत्सवदिनमिदम्। श्रीरामपट्टाभिषेक महोत्सवादिनमिदम्। विक्रमशकस्थापक विक्रमार्कचक्रवर्तिनः पट्टाभिषेकदिनमिदम्। लक्ष्मीदेवी भूलोकमागत्य गृहं गृहं परिभ्रमतीति विश्वासात् सर्वगृहाणि शुचीकरणीयानीति शास्त्रवचनम्। मध्याह्ने पिष्टपाचन भोजनानन्तरं रात्रौ लक्ष्मीदेव्याह्वयनाय स्वगृहे सर्वैः दीपप्रदर्शनम् आचारः महाराष्ट्रदेशे दीपावली पञ्चदिनपर्व। बलिचक्रवर्तिना पाताले कारागारबद्धदेवताविमुक्तिदिनमिदम्। लक्ष्म्या सह श्रीकृष्णः ताः देवताः क्षीरसागरं नीततान्। तदानन्ददिनस्मारकतया लक्ष्मीदेव्याः प्रीतिकरदीपावलीपर्वदिने लक्ष्मी पूजा प्रधान कर्तव्यकार्यं भवति। सर्वपर्वापेक्षया सर्वैः हिन्दूमतस्थैः महानन्दतया निर्वाह्यमानपर्वदिनमिदम्। दीपावलीपर्वदिनं पुरस्कृत्य नूतनवरं जामातारं आहूय नूतनवस्त्राणि समर्प्य विशेषगौरवं प्रदर्शयन्ति। दुर्गतिः तारण चतुर्दशीति निर्णय सिन्धुग्रन्थे नरकचतुर्दशी नाम निर्दिष्टम्। कालिकापुराणं नरकं सत्पुरुषत्वेन वर्णयति "नरकोऽपि तदा धीमान् वेदशास्त्रपारगः सुचिरंराज्यमकरोत् चक्रवर्ती त्रिदशालये।"

आश्वयुजकृष्णपक्षस्य चतुर्दश्यां विधूदये।
तिलतैलेन कर्तव्यं स्नानं नरकभीरुणा।

दीपावलीपर्वदिनमधिकृत्य बहुग्रन्थेषु भिन्नभिन्नकथाः उपलभ्यन्ते। अत्र भागवतकथैव प्रधानतया स्वीकर्तव्या। नरकासुरसंहारे अज्ञानविनाशः ज्ञानज्योतिप्रज्वलनं दीपावलीपर्वदिनं सूचयति।



# वेदान्तदेशिकः

- आचार्य जि.पद्मनाभम्
चरवाणी -९२४७३२८२८६

**श्रीमान् वेङ्कटनाथार्यः कविता कविकेसरी।**
**वेदान्ताचार्यवर्यो मे सन्निधत्तां सदाहृदि।।**

देशिको नाम आचार्यः। वैष्णवसम्प्रदाये बहवः महानुभावाः अचार्यत्वेन भासिताः। वेङ्कटनाथः बहूनां पूजनीय-स्थाने भवति। यथा रङ्गनाथस्वामिनं **नंपेरुमालू**, शठगोपमुनिं **नम्माााल्वारु** इति आह्वयामः तथैव परमभागवतोत्तमः कविकेसरी वेङ्कटनाथः। देशिकः इति सम्भाव्यते। देशिकस्य जन्म नाम वेङ्कटनाथः तिरुपति श्रीवेङ्कटेश्वरदिव्यनक्षत्रे श्रवणानक्षत्रे देशिकः क्रीश श्रीरामानुजावतार समाप्त्यनन्तरं १३० वर्षानन्तरं क्रीश १२६८ जन्म वर्षे गृहीतवन्तः भागवद्रामानुजः श्रीवैष्णवविशिष्टाद्वैतप्रचार प्रतिष्ठापनाय वेदान्तवेत्तृमहापण्डितान् १७४ संख्याकान् सिंहासनाधिष्ठितान् चकार। तेषु अनन्तसोमयाजी एकः। तस्य पुत्रः पुण्डरीकाक्षः, पौत्रः अनन्तसूरी। काञ्चीपुरे अप्पुल्लरु इति भागवतोत्तमः निवसति स्म। श्रीरामानुजस्य आत्यन्तात्मीय भक्तः शिष्यः। अस्य सोदरी स्वस्य पुत्राय अनन्तसूरिने विवाहेन धर्मपत्नीं कर्तुं पुण्डरीकाक्षः, अभ्यर्थयामास। काञ्चीपुराधिष्ठानदैवं वरदराजस्वामी अप्पुलास्वप्ने साक्षात्कृत्य तस्य सोदरीं तोताद्याम्बां अनन्तसूरिने भार्यात्वेन दत्वा विवाहः करणीयः इति एतद्विवाहात् रामानुजसिद्धान्तप्रतिपादकः महाविद्वत्कवीन्द्रः जनिष्यतीति आदेशं ददौ। भगवदाज्ञामनुसृत्य तोताधरम्बा अनसूरि वधूवरयोः विवाहः संवृत्तः। बहुकालपर्यन्तं सन्तानराहित्यात् कदाचित् तिरुमलश्रीनिवासः स्वप्नदृष्ट तिरुमलक्षेत्रमागत्य मद्दर्शनानन्तरं सन्तानं प्राप्स्यतः इत्यवोचत्। पादयात्रया तिरुमलश्रीनिवाससन्दर्शनं प्राप्तौ। तदा श्रीनिवासः वैष्णवबालरूपे स्वप्ने तयोः दृष्टः। तदा तोताम्बायाः स्वप्ने दृष्टः सः भगवान् श्रीनिवासः गर्भालये आराधनोपयुक्तघण्टां तस्याः हस्ते निक्षिप्य एतां वदनात् स्वीकृत्य गिलनं कृतश्चेत् पुत्रवती भविष्यसीत्युवाच। सा स्वामिनं पश्यन्ती घण्टां अगिलत्। पश्चात् रात्रौ निद्रायां दम्पत्योः एकैव स्वप्नः आगतः। स्वप्नमधिकृत्य परस्परमुक्ता आश्चर्यानन्दभरितावास्ताम्। प्रातः दर्शनात् अर्चकाः घण्टाभवात् आश्चर्यचकिताः आसन्। श्रीनिवासः तिरुमलनम्बिमावेश्य मयैव अनन्तसूरिचार्यायाः घण्टा प्रदत्तेति इतः परं गर्भालये घण्टोपयोगः न कर्तव्यः इत्युवाच। तस्मात्कालात् प्रभृति गर्भालयबाह्य स्थाने एव लम्बमानां महतीं घण्टां वादयन्ति। क्री.श.१२८८ संवत्सरे शुक्लपक्षदशमी बुधवारे तिरुमलदिव्यनक्षत्रे श्रवणानक्षत्रे काञ्चीपुरे श्रीवैष्णवदिव्यदेशतिरुत्तत्कुदीपप्रकाश पेरुमालूदेवालयपरिसरे देवदेवघण्टा घण्टावताराल्वारु इति मानवशरीरेण तूप्पलूकुलमणित्वेन भूमाववततार।

वेङ्कटेश्वरतीर्थोत्सव पुण्यकालजातत्वात् बालकस्य मातुलः अप्पुलारु वेङ्कटनाथः इति नामकरणं चकार। पश्चात् सः कञ्चीवरद राज सन्निधिं नीत्वा दर्शनमाकार्य तदाशीर्वादमवाप। ततः तृतीयपञ्चमवर्षे चौलाक्षराभ्यासं कारयामास।

पितरौ वेङ्कटनाथाय सम्प्रदायरीत्या सप्तमवर्षे उपनयनं कारयामासुतुः। वेङ्कटनाथः एकसन्धाग्राही काव्यनाटकशास्त्रदीनि मातुलात् अप्पुल्लारुमहाशयात् अध्ययनं चकार। विंशतिवर्षप्राये एव वेङ्कटनाथः यथोक्तं शास्त्रविद्यां जग्राह ततः सौन्दर्यवत्या गुणवत्या विवाहात् गृहस्थाश्रामं प्रविवेश। मातुलः अप्पुल्लारु वेङ्कनाथाय


सहसा विदधीत नक्रियां अविवेकः परमापदां पदम्।

दिव्यतमगरुडमन्त्रोपदेशं चकार। आदर्शप्रायः वैष्णवः वेङ्कटनाथः उंछवृत्या जीवनं यापयति स्म। तण्डुलादिशाखाहारपदार्थान् शिष्याः अनयन्ति स्म। अयं वेदाध्ययनं कुर्वन् शिष्येभ्यः ग्रामीणेभ्यः बोधयन् वैदिकधर्मत्वेन जीवनं यापयति स्म। गुरौ मातुले स्वर्गङ्गते वेङ्कटनाथः तिरुवहीन्द्रपुरं गत्वा **देवनाथस्वामिनं हेमाम्बुजवल्लीं** आराधयति स्म। मातुलोपदिष्टं गरुडमन्त्रं जपन् तिरुवहीन्द्रपुरसमीपस्थ-औषधगिरौ नरसिंहस्वामिसन्निधौ निद्राहारान् विसृज्य बहुकालपर्यन्तं निश्चलमनस्कः समाधावासीत्। तदा गरुत्मान् साक्षात्कृत्य पुण्यप्रदः हयग्रीवमन्त्रः निरवधिकतया उपास्यः इत्यादिदेश। हयग्रीवोऽपि वेङ्कटनाथपुरतः साक्षात्कृत्य स्वविग्रहं तस्मै ददौ। वेङ्कटनाथाभीष्टमनुसृत्य हयग्रीवः तस्य जिह्वाग्रे परिवेष्ठितवान्। हयग्रीवदेवः अद्यापि तिरुवहीनद्रपुर-देवनाथालये भक्तेभ्यः पूजाः गृह्णाति। वेङ्कटनाथः हयग्रीवस्तोत्रं देवनायकपञ्चाशत् - स्तोत्रं, संस्कृते अच्युतशतकं प्राकृतभाषायां मुम्पणिकोवै नवमणिमालै स्तोत्राणि तमिलभाषायां व्यरचीत्। तिरुवहीन्द्रपुर्यां वेङ्कटनाथः उंछवृत्या एव जीवनं यापयामास। कदाचित् कर्मकारी खण्डेष्टिकाः दत्वा कूपनिर्माणाय वेङ्कटनाथ समार्थ्यं ज्ञातुमपृच्छत्। वेङ्कटनाथः मन्दहासेन कूपं निर्मीय तज्जलमेव तत्र निवासपर्यन्तमुपयुयोज। अद्यापि तत्कूपः सम्यक् वर्तते। वरदराजपञ्चाशत् ग्रन्थे एकः श्लोकः-

निरन्तरं निर्विसतरस्त्वदीयं
अस्पृष्टचिन्तापदमाभिरूप्यं।
सत्यं शपे वारणशैलनाथ
वैकुण्ठवासेऽपि नमेऽभिलाषः।।

भाववर्णनातीतत्वत्सौन्दर्यं निरातङ्कवीक्षणात् नमे वैकुण्ठभिलाषः इति स्वभक्तिं प्रकटीचकार।

कदाचित् कञ्चिसमीपे तिरुप्पुकलिप्रान्ते भयङ्करव्याधिना जननष्टः अपारः आसीत्। वेङ्कटनाथः सुदर्शनाष्टकेन स्वामिनं कीर्तयित्वा तदनुग्रहात् तीव्रव्याधिं उपशमं चकार। तदा प्रजास्सर्वाः स्वस्थाः जाताः।



द्वयतुष्कमिदं प्रभूतसारं, पठतां वेङ्कटनायकप्रणीतं।
विषमेऽपि मनोरथः प्रभवान् न अविहन्येत् रथाङ्गधुर्यगुप्तः।।

कश्चित् दुरात्मा वेङ्कटनाथसामर्थ्यपरीक्षार्थं जलाशयात् जलं पीत्वा तज्जलात् वेङ्कटनाथस्य उदरं अनूह्यपरिमाणं कर्तुं दुष्टप्रयोगं चकार। सर्वशास्त्रनिष्णातः वेङ्कटनाथः दुष्टप्रयोगं ज्ञात्वा समीपस्थ स्तम्भत्वक् स्व नखैः विदीर्य दुष्टप्रयोगकृतजलं स्तम्भात् धारारूपेण बहिस्सरञ्चकार। वेङ्कटनाथोदरः समः साधारणः बभूव। सः मान्त्रिकः वेङ्कटनाथं क्षमामभ्यर्थयामास।

काञ्चीपुरसज्जनाः केचित् तस्य -उंछवृत्ति जीवनमनिच्छन्तः भिक्षादागततण्डुलेषु स्वर्णतण्डुलानि मिश्रीचक्रुः। भार्यागृहागमनानन्तरं भिक्षाद्रव्ये विद्युत्कान्तिवत् प्रकाशमानानि कानीति अपृच्छत्। तदा वेङ्कटनाथः वैराग्यभावेन ते कृमयः इति दर्भेण सुदूरं पातयमास।

**वैराग्यपञ्चकम् -** विद्यारण्यस्वामी सदुद्देशेन वेङ्कटनाथदारिद्र्य-परिहरणाय राजास्थाने पदवीं दापयितुं राजपरिवारं प्रेषयमास। तदा वेङ्कटनाथः तदाह्वानमनङ्गीकृत्य समाधानत्वेन वैराग्यपञ्चक-श्लोकपञ्चकं विलिख्य राजपरिवारद्वारा प्रेषयामास।

नास्ति पित्रार्जितं किञ्चित् न मया किञ्चिदार्जितम्।
अस्ति मे हस्तिशैलाग्रे वस्तु पैतामहं धनम्।।

चतुर्मुखब्रह्मा अश्वमेधयागं कृत्वा कञ्चिनगरे सम्पादिताव्ययनिधौ श्रीवरदराजस्वामिनौ स्थिते सति अन्यधनं मम किमर्थमिति तस्य भावः। कदाचित् कर्णाटकदेशे मुलुबागल् प्रान्ते द्वैताद्वैतमतविवादे प्रवृत्ते विद्यारण्यअक्षोभ्ययोः मध्ये उभयोर्वादं लिखितरूपेण स्वीकृत्य निष्पक्षपाततया अक्षोभ्यवाद एवः वेदप्रमाणमनुसरतीति न्यायनिर्णयं प्रकटी चकार। असिना तत्त्वमसिनापरजीवप्रभेदिना विद्यारण्यमहारण्यं अक्षोभ्यमुनिरच्छिनत्। परजीवभेदतत्त्वमसि इति वाक्यमपि प्रतिपादयतीति गूढार्थोप्यत्र वर्तते इति वैष्णवमाध्वचरित्राणि कथयन्ति। श्रीरङ्गे मायावादिनः विशिष्टाद्वैते निरसनं प्रदर्शयन्तः रामानुजदर्शनं न्यूनीकुर्वन्ति। तदा वेङ्कटनाथः काञ्चिपुरादागतः शास्त्रचर्चायां श्रीरङ्गस्थ मायावादिनां वादं परास्तं चकार।

(अनुवर्तते)

# शमी पूजा



कुमारी लिङ्गरेड्डि उमामहेश्वरी
चरवाणी -
९१८२०७५७६१

**शमी शमयते पापं, शमीशत्रुविनाशिनी।**
**अर्जुनस्य धनुर्धारी रामस्य प्रियदर्शिनी।।**

अस्मिन्वर्षे देवालयेषु गृहेषुच अक्टोबर् द्वितीयतिथौ शमीपूजां निर्वहिष्यन्ति।

शमीवृक्षस्य ३८ नामसु शिवा, माङ्गल्या लक्ष्मी शुभदा इत्यदिनामानि मङ्गलकराणि। दुरितदमनी पापशमनी इत्यादिनामानि पापहारकपुण्यप्रदानि। अग्निजनकत्वात् केशमथनी इत्यादि नामानि वर्तन्ते। शमयति तापं, पापमिति शमीति अर्न्वर्थं नाम। प्रजापतिः समस्तसृष्टौ अग्निमपि ससर्ज। अग्निः जननादेव प्रजापतिमपि दाहयितुमयतत। तस्मात् भीतः सः हरितवृक्षशाखाभिः तं उपशमितञ्चकार। अग्नेः उपशमनार्थमुपयुक्तवृक्षः शमीवृक्षः। इयं कथा मैत्रीयीसंहितायां शतपथब्राह्मणे कथकसंहितायां, कपिस्थलसंहितायां वर्तते। अग्न्याधाने महाग्निसञ्चये समिधत्वेन अस्य प्रामुख्यं दृश्यते। अयं अटवीप्रान्तेषु पर्वतसानुसु अधिकतया वर्धते। जठराग्निं प्रेरयित्वा जीर्णशक्तेः उपकरोति। प्रशान्तिप्रदायी उष्णमुपशमयति। महाभारतकथामनुसृत्य विजयदशम्यामर्जुनः अज्ञातवनवाससमयानन्तरं उत्तरगोग्रहणसन्दर्भे गाण्डीवं धनुर्दधार। अज्ञातवासात् पूर्वं स्वायुधानिशमीवृक्षोपरि गुप्तानि चक्रुः। श्रीरामस्यापि विजयदशम्यां प्रियायाः सीतायाः दर्शनमभूदिति श्लोकार्थः। शमीपत्रैः स्वामिपूजामाचरन्ति। शमीपत्राणि भक्तेभ्यः प्रददति। शमीपत्राणि पुरुषाः कर्णे स्त्रियः शिरसि धरन्ति। पुरा राजानः शमीपूजां कृत्वा युद्धाय प्रस्थिताः। दशरात्रिदिनेषु गणपतिसच्चिदानन्दस्वामी शमीपूजां विशिष्य निर्वहति।

अन्ध्रदेशे शमीवृक्षस्य ''बोणं पोयुट'' अर्थात् भोजनसमर्पणाचारः वर्तते। अशुभनिवारणार्थं शुभप्राप्त्यर्थं शमीपूजा नैवेद्यसमर्पाणानि कुर्वन्त। शमी वृक्षस्य शिवस्वरूपत्वात् वीरभद्रेणैव शिवाय नैवेद्यसमर्पणमिति नैवेद्यं समर्पयन्ति। सन्तानदायकत्वेऽपि शमीवृक्षस्य प्रामुख्यं वर्तते। मत्स्यपुराणमनुसृत्य पुरुषसन्तानाभावे तृतीयविवाहस्यापि ब्राह्मणः अर्हः इति शमीवृक्षेन विवाहाचारः आसीत्।

**गणेशपुराणम् -** गणेशः ब्रह्माणमेवं विवृणोति - कोटिजपाः कोटिदानानि अन्यपूजाः वा मम शमीपत्रसमर्पणपूजायाः तुल्याः न भवन्ति। शमीपदोच्चारणादेव मानसिक, कायिकरुजः नश्येयुः। शमीपत्रस्पर्शमात्रेणैव सर्वविघ्नविनाश कार्यसाफल्यायुर्ज्ञानवृद्धिधपापनाशो भवेदिति अत्र संशयो माभूदित्युवाच।

**शमीमाहात्म्यम् : -** परमेश्वरेण पार्वतीमुद्दिश्य प्रोक्तम् - पुरा प्रियव्रतराजस्य कीर्तिप्रभानामकभार्याद्वये, द्वितीभार्यायां परमप्रीतिरासीत्। द्वितीयभार्यायाः जातपुत्रस्य परिणयोऽपि कारितः। प्रियव्रतस्य प्रथमपत्नी आत्मनि भर्त्रा अनादरात् जीवित निराशया आत्महत्योन्मुखा आसीत्। कदाचित् दैववशात् देवलोनाम ब्राह्मणोतमः तां सान्त्वयित्वा अर्कवृक्षनिर्मित विनायकविग्रहं दत्वा पूजार्थमादिदेश। कीर्तिनाम्नी प्रथमपत्नी वर्षपर्यन्तं गणपतिपूजां श्रद्धया आचरन्ती रात्रौ स्वप्ने शुभपरिणामवार्तां श्रृतवती। राज्ञः द्वितीयपत्न्यां प्रभायां मोहाभिमानं न्यूनं बभूव। प्रथमपत्न्यां अनुरागाधिक्यात् सा पुत्रमेकं सुषुवे। तस्य क्षिप्रप्रसादः इति नामकृतम्। प्रभानामक द्वितीयपत्नी आत्मनि भर्तुः अननुरागत् ईर्ष्यया क्षिप्रप्रसादे सपत्नीपुत्रे विषप्रयोगं कृत्वा मृतञ्चकार। (अनुवर्तते१५)



सपुत्रोयः कुलमुञ्वलयति, सत्ये लोकः प्रतिष्ठितः।



## तिरुचानूरु श्रीपद्मावतीमातुः वार्षिकब्रह्मोत्सवः
## 2025 नवम्बर् 17 तः 25 पर्यन्तम्

| दिनाङ्कः | वासरम् | प्रातः उत्सवः | रात्र्युत्सवः |
|---|---|---|---|
| 17-11-2025 | इन्दुवासरम् | तिरुच्चि उत्सवः ध्वजारोहणम् | लघुशेषवाहनम् |
| 18-11-2025 | भौम्यवासरम् | महाशेषवाहनम् | हंसवाहनम् |
| 19-11-2025 | सौम्यवासरम् | मौक्तिकमण्डपम् | सिंहवाहनम् |
| 20-11-2025 | बृहस्पतिवासरम् | कल्पवृक्षवाहनम् | हनुमद्वाहनम् |
| 21-11-2025 | भृगुवासरम् | आन्दोलिकासेवा | गजवाहनम् |
| 22-11-2025 | मन्दवासरम् | सर्वभूपालवाहनम्, सायं - स्वर्णरथोत्सवः | गरुडवाहनम् |
| 23-11-2025 | भानुवासरम् | सूर्यप्रभवाहनम् | चन्द्रप्रभवाहनम् |
| 24-11-2025 | इन्दुवासरम् | रथोत्सवः | अश्ववाहनम् |
| 25-11-2025 | भौम्यवासरम् | चक्रस्नानम्, पञ्चमीतीर्थं | ध्वजावरोहणम् |







## तिरुचानूरु श्रीपद्मावतीदेव्यै गजवाहनसेवा

गजवाहनं ऐश्वर्यस्य वैभवस्य प्रतीका भवति। मदाति
तत्त्वाहङ्कारस्य प्रतीका गजः। अनन्तैश्वर्यानन्यवैभवप्रतीका
रूपगजस्य मदातिसम्भरितमनोविकारे विजयशक्तिप्रदा
अलमेलुमङ्गा पद्मावतीदेवी स्वतन्त्रवीरलक्ष्मीरूपेविद्यामानत्वात्
इदं गजवाहनं विशिष्टस्थानमलङ्करोति।

गजवरमधिरूढा शंखचक्रासिशाङ्र्ो
द्यमित निशितशस्त्रास्त्रोद्धृढा शात्रवेषु
सुमधुरदरहासेनाश्रितान् हर्षयन्ती
रिपुनिवहनिराशं वीरलक्ष्मीर्विधत्ताम्

गजश्रेष्ठवाहनमधिरूह्य शंखचक्रखड्गशार्ङ्गैः उद्यमिता शत्रुषु निशित
शस्त्रस्त्रोद्धृता सुमधुरमन्दहासेन आश्रितेभ्यः सत्तोषं जनयन्ती
वीरलक्ष्मीः पद्मावतीदेवी शत्रुसमूहं निराशायुतान् करोतु।



## श्रीनिवासमङ्गापुरम्
## श्रीकल्याणकल्याणवेङ्कटेश्वरस्वामिनः पवित्रोत्सवः

| दिनाङ्क | वासरः | उत्सवः | |
|---|---|---|---|
| 16.10.2025 | बृहस्पतिवासरम् | -- | अङ्कुरार्पणम् |
| 17.10.2025 | भृगुवासरम् | पवित्र प्रतिष्ठा | |
| 18.10.2025 | मन्दवासरम् | पवित्र समर्पणम् | |
| 19.10.2025 | भानुवासरम् | पूर्णाहुतिः | |

## हृषिकेष्
## श्रीकल्याणवेङ्कटेश्वरस्वामिनः पवित्रोत्सवः

| दिनाङ्कः | वासरम् | उत्सवः | |
|---|---|---|---|
| 05.10.2025 | भानुवासरम् | -- | अङ्कुरार्पणम् |
| 06.10.2025 | इन्दुवासरम् | पवित्र प्रतिष्ठा | |
| 07.10.2025 | भौमवासरम् | पवित्र समर्पणम् | |
| 08.10.2025 | भसैम्यवासरम् | पूर्णाहुतिः | आश्वयुजमासे प्रवर्तिष्यते |





## वाल्मीकिपुरम् (वायल्पाडु) श्रीपट्टाभिरामस्वामिनः पवित्रोत्सवः

| दिनाङ्कः | वासरम् | उत्सवः | |
|---|---|---|---|
| 04.10.2025 | मन्दवासरम् | -- | अङ्कुरार्पणम् |
| 05.10.2025 | भानुवासरम् | पवित्र प्रतिष्ठा | |
| 06.10.2025 | इन्दुवासरम् | पवित्र समर्पणम् | |
| 07.10.2025 | भौमवासरम् | पूर्णाहुतिः | आश्वयुजपूर्णियाः प्रवर्तिष्यते |

## शमी पूजा (दशमपुटात्)

तदा कीर्तिनाम्नी प्रथमपत्नी पुत्रं मृतं भुजे वहन्ती अरण्ये गच्छन्ती दैववशात् गृत्समदनामकमहर्षिदृष्टिपथङ्गता। सहृदयः सः दिव्यदृष्ट्या तस्याः सर्वं पूर्ववृत्तान्तं ज्ञात्वा पुत्रपुनरुज्जीवोपायं एवमुवाच। हे कीर्ते! विनायकं शमीपत्रैः सम्पूज्य पुण्यार्जनं कृतासि। तत्पुण्यविशेषफलं धारादत्तं कृतश्चेत् पुत्रः पुनरुज्जीवितो भवेदित्युवाच। सा गृत्समदमुनीश्वरोक्तरीत्या शमीपत्रार्चनलब्ध पुण्यफलं पुत्रपुनरुज्जीवनाय धारादत्तं करोमीत्यवोचत्। झटिति पुत्रः अमृतास्वादादिव सुनायासेन पुनरुज्जीवितः अतिष्टत्। कीर्तिः परमानन्दभरिता शमीपत्रमाहात्म्यं अज्ञात्वैव पूजाचरणात् मृतपुत्रपुनरुज्जीवनं जातम्। माहात्म्यं ज्ञात्वा पूजाकृता चेत् कियत्पुण्यं लभेयमिति गृत्समदं शमीपत्रमाहात्म्यमपृच्छत्? तत्सन्दर्भे महर्षिः गृत्समदः शमीमन्दारकाथा मुवाच। तदनुसृत्य सा शमीपत्रपूजां श्रद्ध्या कृत्वा अन्ते परमपदमवाप।

**शमीमन्दारकथा : -** नारदेन इन्द्रमुद्दिश्य प्रोक्तेयं कथा - मालवदेशे और्वो नाम वेदपण्डितः सन्तानरहितः भार्यया समिज्ञया बहुकालपर्यन्तं व्रताचरणात् शमिनामक तनयामवाप। तनयायाः अष्टवर्षानन्तरं धौम्यमहर्षिपुत्रेण मन्दारेण विवाहं कारयामास। मन्दारः शौनकगुरुसन्निधौ विद्याभ्यासं करोति स्म। गच्छति काले कदाचित् मन्दारः गुरोराज्ञामनुसृत्य भार्यापितुः और्वस्यगृहं सभार्यया गच्छन् मार्गमध्ये गणपतिभक्तस्य भृशुण्डिमर्षेराश्रमं प्राप। गणपतिः भृशुण्डिमहर्षेः मुखे स्वस्येव गजाकरं वरात्मना जनयामास। तद्दृष्ट्वा शमीमन्दारौ अपहासञ्चक्रतुः। क्रुद्धः भृशुण्डिमहर्षिः युवां वृक्षौ भवतादिति शशाप। तौ दम्पती वृक्षावभूताम्। शिष्यः मन्दारः बहुकालानन्तरमपि सतीसमेतः नागतः इति भृशुण्डेः आश्रमं गत्वा वाक्सन्दर्भे शमिमन्दारशापवृत्तान्तं शुश्राव। शिष्यस्थितिं ज्ञात्वा शौनकः विचारग्रस्तः आसीत्। और्वशनकौ विनायकमधिकृत्य महत्तपः आचरितवन्तौ। तुष्टः विनायकः सिंहवाहनत्वेन दर्शनं ददौ। शौनकप्रार्थनया शमिमन्दारयोः पूर्वरूपमदत्वा प्रत्यान्मायत्वेन गणपतिः "लोकेत्रये पूज्यौ भवतः इति स्वपूजा स्वपितुः ईश्वरस्य वा पूजा वा शमीपत्रमन्दारपत्रपूजाभावे सफला न स्यादिति" तत्पत्रपूजायाः प्रामुख्यं ददौ। ततः शौनकः स्वाश्रमं जगाम। अद्यापि स एव आचारः पूजायां प्रवर्तते।

शमीपत्रण्यधिकृत्य रघुवंशकथा -

भूजनगरवासिनः वरतन्तोः महर्षेः (४३६० बि.सि) सकाशं सहस्राधिकविद्यार्थिनः आगत्य विद्याभ्यासं कुर्वन्ति स्म। प्रतिष्ठानपुरवासिनः देवदत्तस्य पुत्रः कौत्सः वरतन्तोराश्रमे विद्यार्थी आसीत्। अपारगुरुभक्तितत्परः सः विद्याभ्यासानन्तरं गुरुं निर्बन्धं चतुर्दशविद्यास्थान समतया सुवर्णनाणेकानि दक्षिणारूपेण समर्पयिष्यामीति अनिच्छतः अपि गुरोः वाग्दानं कृत्वा कस्यचित् ब्राह्मणस्य सूचनया रघुमहाराजसकाशं जगाम।

यज्ञे सर्वस्वदाने कृते सति निर्धनोऽपि राजा कौत्सस्य गुरोः दक्षिणासमर्पणवाग्दानं श्रुत्वा कुबेरसकाशात् ततः धनमानेष्यामीत्यावोचत्। कुबेरः रघुणा धनं प्राप्तुं युद्धे प्रकटिते देवेन्द्रसूचनया अयोध्यानगरोपरि शमीवृक्षोपरि सुवर्णनाणेकवर्षः पातयामास। रघुः कौत्साय तद्धनं समर्पयामास। कौत्सः केवलं चतुर्दश कोटिमात्र सुवर्णनाणेकानि गुरुदक्षिणारूपेण स्वीकृत्य शिष्टानि अनावश्यकानि राज्ञे पुनः समर्पयामास। ततः राजा शिष्टानि नाणेकानि कौत्ससूचनानुसारेण शमी वृक्षाधः पातयामास। प्रजाः राजानुमत्या शमीवृक्षसकाशं गत्वा शमीपूजानन्तरं नाणकानि स्वीकृत्य तस्य दातृत्वं प्रशशंसुः। तस्मिन् काले सुवर्णस्पर्शेन पुनीतशमीपत्राणि अद्यापि पूजाद्रव्यत्वेन प्रचारे सन्ति। तस्मात् कालात् राजानः विजयदशम्यां शमीपूजां कृत्वा दण्डयात्रां कृत्वा विजयं साधयन्ति स्म। शमी वृक्षः - महाभारतकथा - (वि.प.५.अध्यायः पाण्डवाः विराटनगरगमनात्पूर्वं शमीवृक्षस्य बृहन्द्रध्रेषु गुहातुल्येषु स्वायुधानि निक्षेपयामासु। वृक्षे एकं शवमपिबद्ध्वा निक्षेपयामासुः।

**विशेषांश : -** राजस्थान्प्रजानां शमीवृक्षः कल्पतरुः राष्ट्रवृक्षः। अन्नवरं सत्यनारायणस्वामिनः सामूहिकव्रतेषु तुलसीपत्रैः शमीपत्राण्यपि उपयुञ्जति। शमीवृक्षः भूमेः, पशुभ्यः मानवेभ्यः आहारप्रादाता। शमीवृक्षत्वचं औषधरूपेण परिवर्तयन्ति। शमीत्वक् भस्मीकृत्य गोमयेन मिश्रीकृत्य खादनाय रोटिकारूपमपि सम्पादयन्ति। स्त्रीषु गर्भस्रावं शमीत्वक्चूर्णं निवारयति। शरीरतापनिवारणाय, सर्पवृश्चिक विषनिवारणाय, सौन्दर्यपोषणाय एवं बह्वौषाधगुणभरितोऽयं शमीवृक्षः। नवरात्रिषु दुर्गादेवीं पट्टणेषु समीपस्थशमीवृक्षपर्यन्तं नीत्वा तत्र शमीपूजां निर्वर्तयित्वा वाहने दुर्गादेवालयंपुनः आनयन्ति।

**शमीं कमलपत्राक्षीं शमींकण्टकधारिणीं**
**आरोहतु शमीं लक्ष्मीर्नृणामायुष्यवर्धनीं।**
**अमङ्गलानां शमनीं दुष्कृतस्य नाशनीं**
**दुस्वप्नहारिणीं धन्यां प्रपद्येऽहं शमीं शुभाम्।।**

# यज्ञवल्क्यजयन्ती

- डा जि.चन्द्रशेखर्
चरवाणी - ९४९१७९४५०६



यज्ञवेदमन्त्रसलक्षणोच्चारणात् गङ्गातीरवासिनः ब्राह्मणश्रेष्ठस्य यज्ञवल्कः इति निरन्तरान्नदानात् वाजसनीति ब्रह्मवेदानां बोधनात् ब्रह्मरातः इति देववरप्रसादात् जातपुत्रत्वात् देवरातः इति सार्थकनामधेयः आसीत्। सुनन्दां परिणीय सत्पुत्रार्थं देवदेवमुद्दिश्य तपः कृत्वा साक्षात्कृतं देवदेवं आत्मतुल्यं पुत्रं ब्रह्मविद्याव्यापनार्थमयायत।

तस्य पत्नी कार्तिक शुद्धद्वादशीभानुवासरे धनुर्लग्ने भगवानिव देदीप्यमानं पुत्रं सुषुवे। जातकर्मानन्तरं पितरमुनुसृत्य पुत्रस्य याज्ञवल्क्यः वाससनी, ब्रह्मरातः दैवरातः इति नामानि आगतानि। अस्य पित्रा पञ्चमवर्षे अक्षराभ्यासः, अष्टमवर्षे उपनयनं च अकारि। ततः याज्ञवल्क्यः बाष्कलात् ऋग्वेदं, जैमिनेः सामवेदं, उद्दालकात् अथर्ववेदमधीतवान्। अल्पकाले वेदत्रयपारीणत्वात् पिता दैवांशसम्भूतं पुत्रं वैशम्पायनाय समर्पयामास। वैशम्पायनः व्यासेन नियुक्तः वेदाध्यापनवृत्तिं निर्वहन् याज्ञवाल्क्यस्य मुख लक्षणान्यवलोक्य तं शिष्यत्वस्वीकरणाय अङ्गीचकार। याज्ञवल्क्यस्य बाल्ये माता, पिता दैवं गुरुरेवेति भावनया विनयेन अध्ययनं कुरु इति पुत्राय आशीः प्रयुज्य पिता यज्ञवल्क्यः स्वगृहं ययौ। याज्ञवल्क्यः भक्त्या गुरुसेवां कुर्वन् यजुर्वेदमभ्यस्य परमार्थरहस्यानि सर्वाणि ज्ञात्वा अनन्तविद्यापारीणः बभूव। याज्ञवल्क्यविद्यामदेन गुरु शुश्रूषाभाग्यात् तेजसा प्रकाशमानः अपि विधिवशात् सात्विकाहङ्कारपूरितः आसीत्। कदाचित् गुरोः प्राप्तं ब्रह्महत्यादोषं सप्तदिनेष्वेव परिहरिष्यामीति अन्यशिष्यसमक्षे याज्ञवल्क्येन प्रतिज्ञाकरणात् असूयाग्रस्ताः अन्यशिष्याः वचनमिदं गुरवे निवेदयामासुः।

**याज्ञवल्क्यविद्यागर्वशिक्षा** - कदाचित् वैशम्पायनः भविनीतं जामातारं क्रोधेन ताडयामास। ततः पश्चात्तप्तः ब्राह्मण ताडनं ब्रह्महत्यादोषसममिति मत्वा दोषपरिराहाय शिष्यान् व्रतमाचरितुमाज्ञां ददौ। प्राप्तावकाशसमयः याज्ञवल्क्यवल्क्यः गुरुदोषहरणमेको करिष्यामीति अन्यशिष्याः तद्दोषां परिहर्तुमक्षमाः इत्यवोचत्। तदा वैशम्यायनः अहमपि तद्दोषपरिहरणासमर्थः। त्वं भ्रमात् एवं वदसि। सहशिष्यान् दोषपरिहरणाय असमर्थाः इत्युक्तोऽसि। मत्तः प्राप्तयजुर्वेदज्ञानात् एवं ब्रवीषि। त्वं मत्प्राप्तयजुर्वेदविज्ञानं वमित्वा दूरं गच्छ, गुरुद्रोही ब्राह्मणनिन्दकः इति सक्रोधं याज्ञवल्क्यमुवाच। तदा याज्ञवल्क्यः गुरुपादपतितः त्वयि गाढानुरागादेव एवमुक्तोऽस्मि, वात्सल्यदृष्ट्या मां क्षमस्वेति प्रार्थयामास। क्रोधादशान्ते गुरौ त्वया बोधितं यदुर्वेदं रक्तरूपेण वमामीति वदन् सप्तदिनेषु भवतः आगतं ब्रह्महत्यादोषं परिहरिष्यामीति प्रतिज्ञां कृत्वा रुधिररूपे यजुर्वेदविज्ञातं वमित्वा तपोबलात् गुरुब्रह्महत्यादोषं परिहृतञ्चकार। याज्ञवल्क्येन रक्तरूपेण वमितं तित्तिरिपक्षिणः भुक्त्वा पुनः ततः वाग्भिः बहिः प्रकाशयामासुः। तदा तित्तिरयः इति वेदशाखाः प्रवृत्ताः। ताः एव तैत्तरीयोपनिषदिति अद्य वदामः।

**सूर्याराधनात् शुक्लयजुर्वेदाध्ययनम्** - याज्ञवल्क्यः गुरुभक्तितः दोषरहितः प्राणायामसहितः व्रतनिष्ठया भास्कराराधनात् भास्करः तेजोरुपे दृष्टः तुष्टः तव गुरोरज्ञातं

शुक्लयजुर्वेदं बोधयित्वा अन्यसमस्तविद्यावाप्तये सरस्वतीमाराधयेत्युक्त्वा अदृश्यः बभूव। ततः सूर्यात् शुक्लयजुर्वेदाभ्यासानन्तरं सरस्वतीदेवीकटाक्षात् अधिगतसर्वविद्याः बभूव। एवममानुषविद्यानिधिः शुक्लयजुर्वेदस्य, पञ्चदशशाखाः वाजिशाखाः इति प्रसिद्धिं कारकः भूत्वा शिष्यप्रशिष्यद्वारा विश्वव्याप्ताश्चकार। अस्य प्रथमशिष्यः कण्वमहर्षिः। तच्छाखीयानां काण्वशाखीयाः इति प्रसिद्धिरागता।

**याज्ञवल्क्यात् शाकल्यमुनिपराजयः -** कदाचित् जनकः यागसमाप्त्यनन्तरं उत्तमोत्तमब्राह्मणस्य धनराशिवितरणाय प्रकटीकृत्य तं उत्तमोत्तमं धनराशिं स्वीकर्तुं विज्ञापयामास। याज्ञवल्क्यः अहमेव उत्तमः ब्राह्मणः इति धनराशिं स्वीकृत्य शिष्यान् गृहं प्रापयितुं प्रेषयामास। तदा शाकल्यमुनिः अहं त्वत्तः अधिकः इति शास्त्रवादाय आगतः पृष्टसहस्रप्रश्नानां सम्यक् समाधाने दत्ते यज्ञवल्क्योपि शाकल्यं शास्त्रविषये एकं प्रश्नं पप्रच्छ। शाकल्यः सम्यक् समाधातुमसमर्थः पराजयमङ्गीचकार। वादनियममनुसृत्य पराजितः मर्तव्यः। शाकल्यः नियममनुल्लंघ्य प्राणान् तत्याज। तस्मात् कालात् जनकः याज्ञवल्क्यं पूजयित्वा अनेकाध्यात्मिक विषयानजानीत्। करुणया निजशक्तया याज्ञवल्क्यः शाकल्यं पुनरुज्जीवयामास

**यज्ञवल्क्येन जनकस्य आध्यात्मिक ज्ञानप्रदानम् -**

**याज्ञवल्यच प्रबोधः -** इन्द्रियानि, अव्यक्तं, ब्रह्म परं, भूतसर्गप्रलयाः तत्कालसंख्याः इत्यादीन् व्यवरीत्। ततः अध्यात्म अधिभूत - अधिदैवतप्रकारानेवं विशदीचकार - पादः पायुः, उपस्था, पाणिः, वाक् एतानि अध्यात्मानि। एतेषां क्रमशः गन्तव्यं, निसर्गः आनन्दः कर्तव्यम्, वक्तव्यमित्यधिभूतानि। एतेषां क्रमशः विष्णु सूर्यः प्रजापतीः इन्द्रः अग्निः अधिवैवतानि। चक्षुः, जिह्वा, घ्राणत्वक् श्रोत्रानि अध्यात्मानि। सूर्यजलभूमिवायु दिशः क्रमशः तेषामधिदैवतानि। मनः अध्यात्म, तस्य अधिभूतं मन्तव्यम् चन्द्रः अधिदैवतम्। बुद्धिः अध्यात्म इति वक्तव्यम्। तस्य अधिभूतं बोद्धव्यम्। क्षेत्रज्ञः अधिदैवतम्, अहङ्कारः अध्यात्म। तस्य अभिमानं अधिभूतम्। रुद्रः अधिदैवतम्। चित्तमध्यात्म। तस्य अधिभूतं चेतयितव्यम् (कृतम्) ब्रह्म अधिदैवतम्।

मनोनिर्विकाराय प्रकृतिपुरुषज्ञानमावश्यकम्। यथा एकः दीपः अनेकदीपान् व्याप्नोति तथैव प्रकृतिः बहुगुणरूपाणि प्राप्नोति।

**त्रिगुणनिर्वचनम् - सत्त्वगुणाः -** आनन्दारोग्य क्रोधार्जवशुद्धिप्रकाशत्वसुस्थिरत्व, अहिंसानिर्मलश्रद्धा - विनीतिलज्ञासत्यशौचसमताचार, अकार्पण्यत्व - अपैशुन्य अकामवृत्तयः सत्त्वगुणाः।

रजोगुणाः - : विग्रह दर्प - अभिमान - कामक्रोध - मात्सर्य - करुणाराहित्य - भोगेच्छा - अहङ्कराः रजोगुणाः।

तमोगुणाः - अप्रकाशमोह अधिकाशन - वाद - प्रमादमौर्ख्य मान्द्य प्रमरण दुःखानि। एते गुणाः अन्तरात्मनः अनेकविकृति कारकाः भवन्ति।

**अध्यात्म -** आत्मस्थस्वरूपम्, अधिभूतं सर्वभूतेषु वर्तमानं, परमात्मा। अधिदेवतम् - अधिष्ठिताभिमानदैवतम्। प्रकृतिः जडम्। अतः आत्मना आत्मज्ञानं प्राप्तश्चेत् शाश्वताच्युतपदं प्राप्य अक्षरः भवेत्। पुरुषः प्रकृतौ प्रकृतिः पुरुषे तिष्ठति। अतः पुरुषः जलमत्स्यवत् विकारं न प्राप्नोति। प्राणायामात् चित्तशरीरे शुद्धता, इन्द्रियाणि मनसि, मनः अहङ्कारे, अहङ्कारः बुद्धौ बुद्धिः प्रकृतौ विलीनत्वात् ध्यानतत्परतासिद्धिः भवेत्। ध्यानतत्परात्मा नित्यानन्दशुद्धज्ञानशिवो भवेत् इति जनकाय याज्ञवल्क्योपदेशः दत्तः।

**याज्ञवल्क्येन विश्वावसाय गन्धर्वेश्वराय बोधिततत्तवप्रकारः -** 'हे गन्धर्वराज! विश्वं नाम भूतभव्य भवत्कर व्यक्ताव्यक्तनामक प्रकृतिरेव। निर्गुणपुरुषः एव विश्वम्। मित्रावरुणौ पुरुषप्रकृती एव। ज्ञानज्ञेय तपोतप सूर्याति सूर्याः प्रकृतिपुरुषाः एव। विद्याविद्या वेद्यावेद्यचलाचलशब्दाः पुरुषस्य प्रकृतेश्च वाचकाः। वेदार्थचिन्तनया अक्षरं स्वीकृत्य पञ्चविंशाख्यतत्परस्य पुरुषस्य केवलत्वं भवति। तस्मात् षड्विंशदर्शन प्राप्तिः भवेत्। ततः तन्मयतया पुरुषोत्तमो भवति। परनिरञ्जनानन्दबोधनित्यं। प्रकृतिः पुरुषं न पश्यति। पुरुषः प्रकृतिं पश्यति। स्नेहसहवासमूल सम्मोहात् कालसमुद्रे मज्जन् गाढाहङ्कारममत्वैः प्रवृद्धवाञ्छः प्रकृत्या पुरुषः ऐक्यं प्राप्नोति। तथा न प्राप्तश्चेत् प्रकृतिपुरुषयोः भिन्नत्वं दृश्यते। प्रकृतिं परित्यज्य पुरुषः विवेकदार्ढ्यात् पञ्चविंशः भवेत् चेत् षड्विंशपदं निस्संशयं लभेत्। अपुनरावृत्तिपदं तदेव। एतच्छ्रुत्वा विश्वावसुः परम्पनन्दभरितः ब्रह्मलोकप्रज्ञानसम्भावनीयोऽसीति सभक्तिप्रणाममाचर्य निजस्थानञ्गाम।

(अनुवर्तते)

शूराय न प्रदातव्या कन्या खलु विपश्चिता।



# तरिगोण्डवेङ्गमाम्बा- वर्धन्ती

- डा.के.कोटेश्वरय्य,
चरवाणी - ९९८५१२३२६२

(तदनन्तरम्)

**क्षुरकः पलायितः -** ग्रामस्थब्राह्मणसंघः तया वैधव्यानङ्गीकरात् तत्कुटुम्भं ग्रामबहिष्कारं करिष्यामः इति भीतिं जनयामास। गत्यन्तराभावात् पितरि दुहितुः शिरोमुण्डनाय अङ्गीकृते वेङ्गमाम्बा इष्टदैवध्यानपरा बभूव। जलाशयतीरे पद्मासनस्थ वेङ्गमाम्बा शिरोमुण्डनाय आगता। क्षुरकः तां समीप्य तां भयङ्करदेवीस्वरूपिणी दृष्ट्वा कम्पमान शरीरः मां क्षमस्वेति प्रार्थयन् पलायितः। क्षुरकेन सह आगताः जनाः अपि तां कालीस्वरूपिणी दृष्ट्वा पलायिताः।

**पुष्पगिरिशङ्कराचार्यपीठाधिपतिः -** तरिगोण्डग्रामस्थाः अवमानबाधिताः कथञ्चित् वेङ्गमाम्बया वैधव्यत्वमङ्गीकारयितुं प्रायतन्त। पुष्पगिरिशङ्कराचार्यपीठाधिपतिं विद्यानृसिंहभारती स्वामिनं तरिगोण्डग्राममाहूय लक्ष्मीनृसिंहदेवालये धार्मिकसभां निर्वाहितवन्तः। पीठाधिपतिं गुरुपीठमधिष्ठापयामासुः। पीठाधिपतिः त्वामाहूतवानिति एकः परिचारकः वेङ्गमाम्बायाः सन्देशं प्रापयामास। सा सदभिप्रायेण नारिकेलहस्ता सभां जागाम। ग्रामस्थाः इयं पूर्वाचारविरुद्धेति पीठाधिपतिवेङ्गमाम्बयोर्मध्ये परस्परदर्शनं विना मध्ये आच्छादनवस्त्रं लम्बमानं निवेशयामासुः। पीठाधिपतिः तामुद्दिश्य ब्राह्मणी स्त्रीः त्वं, वैधव्यपद्धतिमनुसृत्य शिरोमुण्डनाय कुतः नाङ्गीकृतवतीति पप्रच्छ। वेङ्गमाम्बा समाधानतया अहं वेङ्कटाचलपतिमेव पतिभावनया आराधयामि। सुमङ्गलीचिह्नानि न परिहर्तव्यानीति मम विश्वासः। लोकाचारः न मया पालनीयः। मम पतिः भगवानेव, पतिव्रतास्त्रियं क्षुरकः कथं स्प्रष्टुमर्हः, मयापि सः स्प्रष्टुं न युक्तः पतिव्रतया क्षुरकस्पर्शः कस्मिन् शास्त्रे वर्तते। सोऽपि मां क्षौरकर्मेति स्प्रष्टुमनर्हः। कर्तनेनापि पुनः केशाः उद्भविष्यन्ति इति स्ववादं श्रावितवती। ततः गुरुपीठाय भक्तिमत्या त्वया कुतः नमस्कारः न कृतः इति पीठाधिपतिरपृच्छत्। तदा गुरुपीठनमस्काराय अवरोधवस्त्रं वर्तते। कथं नमस्करिष्यामीत्यवोचत्। गुरुपीठात् त्वं अवरुह्य बहिरागच्छ तदाहं गुरुपीठं नमस्करिष्यामीत्यवोचत्। तदा उभयोमध्ये आच्छादवस्त्रं दूरीकृतम्। वेङ्गमाम्बा लक्ष्मीनृसिंहं ध्यात्वा पुष्पगिरिपीठं नमश्चकार, तत्क्षणं सिंहगर्जनध्वनिरुद् बभूव। पीठात् अग्निज्वालाः प्रादुर्भूय पीठः दग्धः आसीत्। पीठाधिपतिः भीतः कम्पमानः इयं नृसिंहभक्तिमती, प्रह्लादांशेन जाता कारणजन्मवतीति ग्रामस्थान् विनिन्द्य तस्मै नमस्कृत्य स्व परिवारेण सह पुष्पगिरि पीठं जगाम। पीठाधिपतिसमक्षे स्वमहिमप्रदर्शन कृतज्ञतया नृसिंहविलासकथेति यक्षगानं व्यरचीत्। ततः शिवनाटकमिति यक्षगानकथाग्रन्थं, ततः राजयोगामृतसारमिति वेदान्तकाव्यं, ९०० द्विपदछन्दसि, ततः बालकृष्णनाटकं व्यरचीत्।

**तरिगोण्डालये तपः -** वेङ्गमाम्बानृसिंहालये प्रत्यहं बहुसमयपर्यन्तं ध्याननिमग्ना भवित स्म। युवत्या स्वामिसन्निधिः अपवित्रः भवतीति कृष्णमाचार्यनामक पूजाकारी समाधिस्थवेङ्गमाम्बायाः केशान् आचकर्ष। सा समाधिस्था जागृता तीक्ष्णदृष्ट्या तमपश्यत्। तया योगीश्वरीदृष्ट्या मूर्छितः सः किञ्चित्समयानन्तरं मूर्छायाः जागृतः क्षमस्वेति पादपतितः आसीत्। नरहरिसंकल्पादेव ध्यानविघ्नः जातः इति चिन्ता निमग्ना आसीत्। झटिति तिरुमल पुण्यक्षेत्रं तस्याः मनसि स्मृतमासीत्। झटिति तिरुमल क्षेत्रं प्रस्थितवती। मार्गमध्ये युद्धकलानामक पुण्यतीर्थाञ्जमय स्वामिदेवालये तीव्रं तपः आचरन्त्यासीत्। तस्यै श्रीवेङ्कटेश्वरः साक्षाकृत्य तिरुमलक्षेत्रमागन्तुं, आदेशं ददौ। सा तिरुमलक्षेत्रं प्राप्य दिव्यानुभूतिं प्राप्य वेङ्कटाचलं आशुपद्येन तुष्टाव।

ततः पुष्करिणीस्नानानन्तरं वराहस्वामिनं सन्दृश्य स्वयं व्यक्तार्चामूर्तिं भक्तिपारवश्येन दृष्ट्वा महाद्वारमार्गात् स्वामिसन्निधिं प्राप्य रात्रौ एव स्वामिनं ध्यायन्ती आसीत्। ततः सूर्योदयात् पूर्वं वेङ्कटेश्वरदर्शनं प्राप्य तदादेशात् अलमेन्मङ्गां तिरुमल क्षेत्रे स्थातुं निवासाय प्रार्थयामास। निशायां अलमेलूमङ्गाम्बा आत्मारांदासेन स्वप्ने दृष्टा वेङ्गमाम्बायाः आश्रयकल्पानार्थं सूचिता। आत्मारांदासः पुष्करिण्याः ईशान्यदिशि वेङ्गमाम्बायाः कुटीरं निर्ममे। तत् कुटीरचिह्नानिं १९८५ पर्यन्तं दृश्यन्ते स्म। वेङ्गमाम्बा कुटीरसमीपस्थहयग्रीवस्वामिमन्दिरे हयग्रीवमाराधयन्ती तत्कटाक्षात् महाकवयित्री बभूव। तत्र कण्ठरोगिणः रोगः परिहृतवती। तत्र विष्णुपारिजातनामक यक्षगानं रचितवती। ततः आत्मारांदासकुटीरं तत्याज। अन्नमाचार्यवंशीयाः वेङ्गमाम्बामहात्त्वं विज्ञाय उत्तरमाडवीथ्यां तस्याः उचितनिवासं कल्पयामासुः। तद्गृहे सा रमापरिणयद्विपद काव्यं रचितवती। ततः तुम्बुरुकोणे तपः कुर्वन्ती चेञ्चुनाटकं रचितवती। ततः पुनःरुक्मणीनाटकं गोपिकानाटकं श्रीभागवतं वेङ्कटाचलमाहात्म्यं अष्टाङ्गयोगसारः जलक्रिडाविलासः मुक्तिकान्तविलासः वासिष्ठरामायणं तत्त्वकीर्तनानि रचयामास। वेङ्गमाम्बा रात्रावेकान्तसमये कर्पूरारात्रिकं समर्पयन्ती अर्चकानामासूयापात्रं बभूव। रथोत्सवे एकदा रथाः वेङ्गमाम्बानिवासगृहपुरतः निश्चलः बभूव। ततः तस्याः भक्ति प्रभावदेव रथः निश्चलः जातः इति, तदा स्वदोषं क्षमस्वेति अर्चकाः वेङ्कमाम्बां प्रार्थितवन्तः। सा स्वामिने कर्पूरनिराजनं समपर्तितवती। ततः झटित्येव उत्सवरथः चचाल। ततः प्रभृति तथैव कर्पूर नीराजनं दीयतेस्म। अद्यपि तन्नाम्ना कर्पूरनीराजनं समर्प्यते। तदा स्वदोषं क्षमस्वेति अर्चकाः वेङ्गमाम्बां प्रार्थितवन्तः।

**महासमाधिः -**

वेङ्गमाम्बानिर्मित पुष्पोद्यान बृन्दावने नित्यध्यानसमाधिस्थले तस्याः सूचनाः अनुसृत्य चतुश्शिलास्तम्भयुत - समाधिमण्टपः निर्मितः। महाज्ञानिनी पूर्वमेव स्वमरणदशां ज्ञातवती। ईश्वरनामसंवत्सरश्रावण शुद्धनवम्यां निर्णीतसमये गोविन्दनामस्मरणं कुर्वन्ती सामाधिमण्टपं प्राप्य समाधौ प्रविश्य पद्मासनासीना नारायणाष्टाक्षरीमन्त्रं त्रिकरणशुद्ध्या जपन्ती आसीत्। वेदमन्त्रवेङ्कटेश्वर विष्णुनृसिंहसहस्रनाम पठने प्रवर्तमाने कुण्डलिनी शक्तिं षट्कमल द्वारा प्रेरयित्वा सहस्रारे विजृम्भितां कृत्वा निर्विकल्पसमाधौ संलीना वेङ्गमाम्बा स्वच्छन्दतया ब्रह्मरन्ध्रं भेदयित्वा ज्योतिस्वरूपे श्रीवेङ्कटेशपरमात्मारामे समैक्यं प्राप्ता। ततः अशेषजनैः जय जय ध्वनयः कृताः। देवताभिरपि अभिनन्दनसूचकतया आकाशात् पुष्पवृष्टिः वर्षिता। मङ्गलद्रव्यसम्भारान् समाधौ समन्त्रकं निक्षिप्य ततः स्व शिष्यबृन्दैः समाधिः आच्छादितः आसीत्।

**मातृश्री तरिगोण्डवेङ्गमाम्बारचनाः -**

१. तरिगोण्डग्रामे
२. नृसिंहशतकम् (पद्यशतकम्)
३. नारसिंहविलासकथा - यक्षगानम्
४. राजयोगामृतसारः - द्विपदकाव्यम्
५. बालकृष्णनाटकम् - यक्षगानम्

**तिरुमलक्षेत्रे रचिताः -**

६. विष्णुपारिजातम् - (यक्षगानम्)
७. रमापरिणयः - द्विपदकाव्यम्
८. चेंचुनाटकम् - यक्षगानम्
९. श्री वेङ्कटेश्वरकृष्णमञ्जरी (मञ्जरीद्विपदे)
१०. रुक्मणीनाटकम् (यक्षगानम्)
११. गोपिकानाटकम् - यक्षगानम्
१२. श्रीभागवतम् - द्विपदकाव्यम्
१३. श्रीवेङ्कटाचलमाहात्म्यम् - ६ आश्वास पद्यकाव्यम्
१४. अष्टाङ्गयोगसारः - पद्यकृतिः
१५. जलक्रीडाविलासः - यक्षगानम्
१६. मुक्तिकान्ताविलासः - यक्षगानम्
१७. तत्त्वकीर्तनानि (आध्यात्मिकगोयानि)
१८. वासिष्ठरामायणम् (द्विपदकाव्यम्)



# अहङ्कारः पतनायैव, ऋषीश्वराः सर्वदा गौरवनीयाः

तेलुगु मूलम् - मोलक उत्तर फाळ्गुणी
चित्राणि - डा. के. श्रीधरण् कौलिकि
संस्कृतानुवादः - डा.सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०






तिषवृक्षोऽपि संवर्ध्य स्वयं छत्तमसाम्प्रतम् कुमरसं।




नीतिः - अहङ्कारः त्याज्यः। महर्षयः पूजनीयाः। अहङ्कारत्यागः सर्वसुगुणेभ्यः अधिकः। अहङ्कारयुतः महर्ष्यवमन्ता राक्षसो वा क्रूरजन्तुर्वाभूत्वा दुःखान्यनुभविष्यति। अतः पूज्यान् पूजयित्वा अहङ्कारं परित्यज्य सज्जन्म प्राप्स्यामः।

# द्वादशराशीनां अक्टोबर् मासफलानि 2025

आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः, चरवाणी - ९८४९२६४६०७

१.मेषराशिः - आध्यात्मिकचिन्तनेन लाभः भविष्यति। धनधान्याभिवृद्धिः, सात्विकगुणः, तीर्थयात्राभिलाषः, बन्धुसमागमः, सोदरसोदरीलाभः, उद्योगविकासः। तदा तदा मनोभीतिः सञ्जायते, दैवदर्शनद्वारा मनसः अनन्दं च प्राप्नोति। शनिग्रहपूजा कर्तव्या।

२.वृषभराशिः - सद्व्ययः, वाक्पारुष्यं, वाहनसौख्यं, बन्धुसमागमः, बुद्धिविकासः, सन्तानाभिवृद्धिः, सोदरदुःखं, कर्मविलोपः, अधिकारजनानां पीडा तदा तदापि सम्भवन्त्यपि धनयोगः सर्वत्रानन्दं विदेशगमनलाभः सम्भवन्ति। सूर्याराधनं करणीयम्।

३. मिथुनराशिः - प्रयाणसौख्यं, वाहनलाभः, व्यापराभिवृद्धिः, भूगृहलाभः, उद्वेगः, अकस्मात् धनप्राप्तिः, उद्योगविकासः, अधिकारजनद्वारा प्रशंसार्हाः, नूतनजनानां परिचयः सञ्जायन्ते। शिवग्रहाराधनं करणीयम्।

४.कर्काटकराशि : - ज्वरपीडा, प्रयाणनष्टं, धनव्ययः सम्भवन्त्यपि पितृमूलकतया पैतामहमूलकतया धनप्राप्तिः, वाक्लाभः धर्मार्थचिन्तनम् तीर्थयात्रा, दैवदर्शनं, परदेशगमनं च सम्भवन्ति। राहुग्रहपूजा कर्तव्या।

५. सिंहराशिः - आध्यात्मिकचिन्तनम्, पुराणपठनम्, शास्त्रचिन्तनम्, दैवदर्शनं, उद्वेगः शुभस्वप्नलाभः सम्भवन्ति। मातृचिन्तनं अधिकं भवति। ज्वरपीडा, कार्यविघ्नाः सम्भवन्त्यपि दैवानुग्रहवशात् शुभानि सम्भविष्यन्ति। विष्ण्वाराधनं करणीयम्।

६. कन्याराशिः - पत्नीसौख्यं, शारीरकोत्साहः, उद्योगपरिवर्तनं, मानसोल्लासः, वाक्पारुष्यं, गृहे अनूह्य शुभपरिणामाः सोदरचिन्तनम् मातुः अनारोग्यचिन्ता, प्रयाणनष्टं च सम्भविष्यन्ति। गुरुग्रहपूजा कर्तव्या।

७. तुलाराशिः - सर्वत्रविजयः, स्त्रीलाभः, अधिकधनव्ययः, मनसः चिन्तनं, तदा तदा शतृपीडा मनोदुःखं सम्भवन्त्यपि दैवानुग्रहवशात् सर्वत्र सौभाग्यपरम्परालाभः बन्धुसमागमः सञ्जायन्ते। लक्ष्मीपूजा कर्तव्या।

८. वृश्चिकराशिः - सत्कार्येभ्यः धनव्ययः, तदा तदा ज्वरपीडा, मनोदुःखं, विदेशगमन सूचना, आत्मनः क्लेशः, स्त्रीजनद्वारा सन्तोषः, वाहनसौख्यं अधिकारजनद्वारा मनोभीतिः, तीर्थयात्राभिलाषः, दैवदर्शनं च सम्भविष्यन्ति। विष्णोः आराधनं कर्तव्यम्।

९. धनूराशिः - सर्वत्रलाभः, कुटुम्बाभिवृद्धिः, धनधान्यलाभः, बन्धुसमागमः, इष्टवस्तुप्राप्तिः, भूलाभः, मन्त्रशक्तिसंसाधनम् भार्यापुत्रादिलाभः, सर्वकार्यविजयः, शरीरोत्साहः, मनोल्लासः, विदेशगमनचिन्ता सञ्जायन्ते। लक्ष्मीपूजा कर्तव्या।

१०. मकरराशिः - वाक्पारुष्यम्, अधिकारजनप्रीतिः, सद्व्ययः, उद्योगलाभः, कुटुम्बचिन्ता, उद्वेगः, गुरुजनश्रद्धा, बन्धुसमागमः, शत्रुबाधा, देवतागुरुदर्शनं, भूलाभः, पुस्तकपठनम् राजसम्माननम् सम्भवन्ति। श्रीमहाविष्णुपूजा कर्तव्या।

११. कुम्भराशिः - शरीरस्य अस्वास्थ्यम्, वैराग्यम्, वाक्पारुष्यम्, मानसिकचिन्ता, कुटुम्बदुःखम्, मनोभीतिः, वृथाविवादाः, विदेशगमनाभिलाषः, धनादायचिन्तनम्, आध्यात्मिकजीवन परम्पराभिलाषः सम्भवन्ति। श्री महाविष्णोः आराधन कर्तव्यम्।

१२. मीनराशिः - काठिन्यप्रदर्शनम्, परदूषणम्, चिन्तनम्, मातृश्रद्धा, स्त्रीदुःखम्, आत्मोन्नतिसम्पादने हानिः, उद्योगपरिवर्तनम् प्रजाहितकार्येषु श्रद्धा, प्रीतिभोजनं, अनूह्यधनलाभः, शुभवार्ताश्रवणं सम्भवन्ति। शिवाराधनं कर्तव्यम्।



विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया (रघु-८-४६)

Printed by Sri R.V.Vijaya Kumar, B.A.B.Ed. and Published by Dr.V.G. Chokkalingam, M.A., Ph.D.,on behalf of Tirumala Tirupati Devasthanams and Printed and Publised at Tirumala Tirupati Devasthanams Press, K.T. Road,Tirupati 517 507.
Editor : Dr.V.G. Chokkalingam, M.A., Ph.D.




नवाधिकसप्ततिस्वातन्त्र्यदिनसन्दर्भे15.08.2025 तिथौ ति.ति.देवस्थान परिपालनभवनप्राङ्गणे अत्यन्तवैभवोपेततया स्वातन्त्र्यदिनकार्यक्रमं ति.ति. देवस्थानेन निर्वाहितम्। अस्मिन् कार्यक्रमे ति.ति.देवस्थान धर्मकर्तुमण्डल्यध्यक्षः ति.ति.देवस्थान पूर्वकार्यनिर्वहणाधिकारी, अनुबन्धकार्य निर्वहणाधिकारी, अन्ये प्रधानोद्योगाधिकारिणश्च भागं गृहीतवन्तः।



16.08.2025 तिथौ ति.ति.देवस्थानाधर्मकर्तुमण्डल्यध्यक्षाः तमिलनाडुचेन्नै नगरस्थ ति.ति.देवस्थानसम्बन्धि श्रीवेङ्कटेश्वरस्वामिपद्मावती मन्दिरं प्रविश्य तत्रस्थ श्रीवेङ्कटेश्वरस्वामिनः दर्शनभाग्यं प्रापुः।



16.08.2025 तिथौ आडिकृत्तिकापर्वदिनसन्दर्भे तमिलनाडु तिरुत्तणिनगरस्थ श्रीसुब्रह्मण्यस्वामिने ति.ति.देवस्थान पक्षतः पवित्रपीताम्बरं ति.ति.देवस्थान धर्मकर्तु मण्डल्यध्यक्षाः समर्पयामासुः।



तिरुपतिनगरस्थ यस्.वि.गोशालायां गोकुलाष्टमीपर्वदिनसन्दर्भे 16.08.2025 तिथौ गोपूजामहोत्सवः अत्यन्तवैभवोपेततया सम्पन्नः। अस्मिन् सन्दर्भे पूर्व ति.ति.देवस्थानकार्यनिर्वहणाधिकारिणा शास्त्रोक्तरीत्या गोपूजामहोत्सवः निर्वाहितः।





08.08.2025 तिथौ तिरुचानुरुक्षेत्रस्थ पद्मावतीदेवीमन्दिरे अत्यन्तवैभवोपेततया वरलक्ष्मीव्रतम् निर्वाहितम्। अस्मिन् सन्दर्भे धर्मपत्नी सहितः पूर्व ति.ति.देवस्थानकार्यनिर्वहणाधिकारी, धर्मपत्नीसहितः संयुक्त कार्यनिर्वहणाधिकारी, भागं गृहीतवन्तौ। अस्मिन्नेव कार्यक्रमे धर्मकर्तुमण्डलीसभ्याः अन्योन्नताधिकारिणश्च भागं गृहीतवन्तः। अस्मिन् सन्दर्भे स्वर्णरथे देव्या भक्तेभ्यः दर्शनं दत्तम्।

SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY
TIRUMALA TIRUPATI DEVASTHANAMS PRINTING ON 25-09-2025 & posting at Tirupati
RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal
Regd. No. TRP/154/2024-2026" LICENCED TO POST WITHOUT PREPAYMENT
No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 1st of every month.



श्रीमनवालमहामुनि शातुमोर

27.10.2025